# देवीमाहात्म्यम्  चतुर्थोऽध्यायः २४ – २७

Devīmāhātmyam chapter 4 verses 24-27

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ।
घण्टास्वनेन नः पाहि चापज्यानिस्स्वनेन च ।।२४।।

24. śūlena pāhi no devi pāhi khaṅgena cāmbike
ghaṇṭāsvanena naḥ pāhi cāpajyānissvanena ca

प्राच्यां रक्ष प्रतीच्यां च चण्दिके रक्ष दक्षिणे ।
भ्रामणेनात्मशूलेन उत्तरस्यां तथेश्वरि ।।२५।।

25. prācyāṁ rakṣa pratīcyāṁ ca caṇdike rakṣa dakṣiṇe
bhrāmaṇenātmaśūlena uttarasyāṁ tatheśvari

सौम्यानि यानि रूपानि त्रैलोक्ये विचरन्ति ते ।
यानि चात्यन्तघोराणि तै रक्षास्मांस्तथा भुवम् ।।२६।।

26. saumyāni yāni rūpāṇi trailokye vicaranti te
yāni cātyantaghorāṇi tai rakṣāsmāṁstathā bhuvam

खङ्गेन शूलगदादीनि यानि चास्त्राणि तेऽम्बिके ।
करपल्लवसङ्गीनि तैरस्मान्रक्ष सर्वतः ।।२७।।

27. khaṅgena śūlagadādīni yāni cāstrāṇi te'mbike
karapallavasaṅgīni tairasmānrakṣa sarvataḥ